सङ्क्रमो नाम गुणवृद्धिप्रतिषेधविषयः। परिमृजन्ति, परिमार्जन्ति। [1]परिमृजन्तु, परिमार्जन्तु। लघूपधगुणस्याप्यत्र प्रतिषेधः। अचिनवम्, असुनवम् इत्यादौ [2]लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकम् ङिति यत्कार्यं तल्लकारे ङिति[3] न भवति इति[4]॥

## दीधीवेवीटाम्। (६/२१९०)

दीधीवेव्योः इटश्च ये गुणवृद्धी प्राप्नुतः, ते न भवतः। आदीध्यनम्, आदीध्यकः। [5]आवेव्यनम्, आवेव्यकः। इटः खल्वपि - कणिता श्वः। रणिता श्वः। वृद्धिरिटो न संभवति [6]इति लघूपधगुणस्यात्र[7] प्रतिषेधः॥

## हलोऽनन्तराः संयोगः। (७/३०)

भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसञ्ज्ञा भवन्ति। समुदायः सञ्ज्ञी। जातौ चेदं बहुवचनम्। तेन द्वयोर्बहूनां च संयोगसञ्ज्ञा सिद्धा भवति। अग्निः इति गनौ। अश्वः इति शवौ। कर्णः इति रणौ। इन्द्रः, चन्द्रः मन्द्रः इति नदराः। उष्ट्रः, राष्ट्रम्, [8]भ्राष्ट्रम् इति षटराः। तिलान्स्त्र्यावपति इति नसतरयाः, नतसतरया वा। हलः इति किम्? तितउच्छत्रम् (नि. ४. ९. १०) – [9]'संयोगान्तस्य लोपः' (८. २. २३/५४) इति लोपः स्यात्। अनन्तराः इति किम्? पचति[10] पनसम् – 'स्कोः संयोगाद्योरन्ते च' (८. २. २९/३८०) इति लोपः स्यात्। संयोगप्रदेशाः -- 'संयोगान्तस्य लोपः'[11] (८.२.२३/५४) इत्येवमादयः॥

## मुखनासिकावचनोऽनुनासिकः। (८/९)

मुखसहिता नासिका मुखनासिका, तया य[12] उच्चार्यते वर्णः सोऽनुनासिकसञ्ज्ञो भवति। 'आङोऽनुनासिकश्छन्दसि' (६. १. १२६/३५२५)। अभ्र आँ[13] अपः (ऋ. ५.४८.१)। [14]गभीर आँ उग्रपुत्रे (ऋ. ८.६७.११)। [15]च न आँ इन्द्रः (?)। मुखग्रहणं किम्? अनुस्वारस्यैव हि स्यात्। नासिकाग्रहणं किम्? कचटतपानां मा भूत्। अनुनासिकप्रदेशाः – 'आङोऽनुनासिकश्छन्दसि' (६. १. १२६/३५२५)[16] इत्येवमादयः॥

## तुल्यास्यप्रयत्नं सवर्णम्। (९/१०)

तुल्यशब्दः सदृशपर्यायः। आस्ये भवमास्यं ताल्वादिस्थानम्। प्रयतनं प्रयत्नः स्पृष्टतादिर्वर्णगुणः। तुल्य

---

1. एतन्नास्ति ग.फ.ह. 2. लकारस्य नास्ति ब. 3. ङिति नास्ति अ. फ. 4. इति नास्ति फ. 5. नास्ति फ. ह. 6. नास्ति फ, एव ह. 7. अत्र नास्ति फ. 8. नास्ति फ, भ्राष्ट्र ड, राष्ट्रः ह, छत्रः ह. 9. संयोगान्तलोपः स्यात् फ. ह, लोपो मा भूत् अ. 10. पचतीति फ. 11. संयोगादेरातो धातोः यणावतः ग.फ. 12. यो वर्ण उच्चार्यते फ, उच्चार्यंते यो ब. 13. आँ नास्ति फ. 14. गभीरमप उग्रपुत्रे फ, उग्रपुत्रे जिघांसतः अ. 15. एतन्नास्ति फ, च्यवन आँ अपः अ.क, वचन आँ इन्द्र ब, अचत आँ अपः ड. 16. अनुनासिकस्य क्विझलोः (6.4. 15/2666) ग. फ.